दुर्भिक्षं जायते सर्व्वा मेदिनी दूष्यति प्रिये ।
शष्पं व्रजन्ति तोयानि पीड़िता मानवा भुवि ॥३५॥
सुवर्णरूप्यधान्यानि जगत् सर्व्वं सुशोभनम् ।
ब्राह्मणा वणिजस्तुष्टाः सुभिक्षे शुभकृत् प्रिये ॥ ३६ ॥
सुभिक्षं क्षेममारोग्यं हृष्टा गोब्राह्मणाः प्रिये ।
सुस्थिताः शोभने वर्षे प्रजाः सर्व्वाः सुलोचने ॥ ३७ ॥
विषमस्थं जगत् सर्व्वं व्याकुलं समुदाहृतम् ।
जनानां जायते भद्रे क्रोधे क्रोधः परस्परम् ॥३८॥
सर्व्वत्र जायते क्षेमं सर्व्वशस्यमहार्घता ।
विश्वावसौ वरारोहे कार्पासस्य महार्घता ॥३९॥
पार्थिवैर्नृपसैन्यैश्च समस्तैः खण्डमण्डले ।
प्रपीड्यन्ते जनाः सर्व्वे भयभीताः पराभवे ॥४०॥
तृणधान्यानि पीड्यन्ते शोषे वर्षति वासवः ।
प्लवङ्गे पीड़िताः सर्व्वाः प्रजाश्च सुरवन्दिते ॥४१॥
जायन्ते सर्व्वशस्यानि सुभिक्षं निरुपद्रवम् ।
सौम्यदृष्टिर्भवेद्राजा कीलके च शुभं वदेत् ॥४२॥
सुभिक्षं क्षेममारोग्यं सुखञ्च निरुपद्रवम् ।
साम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितम् ॥ ४३ ॥
तोयपूर्णो भवेन्मेघो वर्षते च दिने दिने ।
निरुपद्रवाश्च राजानः सर्व्वसाधारणे प्रिये ॥४४॥
वासवो वर्षते देवि देशे चाखण्डमण्डले ।
अहिच्छत्रे कान्यकुब्जे विरोधी क्षयिनाशकृत् ॥४५॥
अभिभूतं जगत् सर्व्वं कोपैर्ब्बहुविधैः प्रिये ।
मारुतैः फलदाहैश्च परिवारिणि शोभने ॥४६॥
निष्पत्तिः सर्व्वशस्यानां सुभिक्षं भवति प्रिये ।
प्रमाथिनि जलाहारी जलदो मोदते प्रजा ॥४७॥
निष्पत्तिः सर्व्वशस्यानां सर्व्वशस्यमहार्घता ।
घृतं तैलसमं याति आनन्दे नन्दति प्रजा ॥४८॥
कोद्रवाः शालिमुद्गाश्च पीड्यन्ते वरवर्णिनि ।
सर्व्वौषधानि धान्यानि राक्षसे निष्ठुराः प्रजाः ॥ ४९ ॥
दुर्भिक्षं जायते घोरं धान्यौषधिप्रपीड़नम् ।
अनले च समाख्यातं नात्र कार्य्या विचारणा ॥ ५० ॥
देशभङ्गः सुदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुपद्माक्षि दुर्भिक्षं नर्म्मदातटे ॥५१॥
गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः ।
वासवो वर्षते देवि शस्यञ्च नहि जायते ॥
तिलसर्षपमाषादिकार्पासानां महार्घता ।
गोमहिष्यः सुवर्णानि कांस्यताम्रादयस्तथा ॥
तत् सर्व्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चयः ।
तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्द्दिनम् ।
पार्थिवा मोषका दीनाः कालयुक्ते प्रपीड़िताः ॥ ५२ ॥
तोयपूर्णाः स्थिता मेघा बहुशस्या च मेदिनी ।
निष्ठुराः पार्थिवा देवि ! सिद्धार्थे च वरानने ! ॥ ५३ ॥
अल्पतोया घनाश्चैव कीटकाः प्रबलाः स्थिताः ।
विरुद्धाः पार्थिवा देवि रौद्रे संवत्सरे प्रिये ॥ ५४ ॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेद्वै मध्यमा वृष्टिर्दुर्म्मतौ समुपस्थिते ॥ ५५ ॥
सुभिक्षं जायते लोकः सर्व्वोपद्रववर्ज्जितः ।
प्राणिनां जायते हर्षो दुन्दुभौ वरवर्णिनि ॥५६॥
महिषीगोहिरण्यादिताम्रकांस्यादयस्तथा ।
तत् सर्व्वं देवि ! विक्रीय कर्त्तव्यो धान्यसञ्चयः ॥
रक्ते संवत्सरे देवि ! क्रूरबुद्धिर्नराधिपः ।
मानवाः क्रूरचेष्टाश्च संग्रामे न जयो भवेत् ॥५७॥
दुर्भिक्षं मरणं रोगो धान्यौषधिप्रपीड़नम् ।
पापरोगी भवेद्देवि ! रक्ताक्षेऽमरवन्दिते ॥५८॥
रोगो मरणदुर्भिक्षं विरोधो बहुसंकुलः ।
क्रोधे तु विषमं सर्व्वं समाख्यातं हरप्रिये ! ॥५९॥
मेदिनी चलते देवि ! सर्व्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा ॥
सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ! ॥
कौमुदीचर्म्मनद्योश्च यमुनानर्म्मदातटे ।
विन्ध्यायां सैन्धवे चापि विनश्यति न संशयः ॥
सिंहलं मध्यदेशञ्च कालञ्जरं तथैव च ।
क्षये क्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ॥” ६० ॥ * ॥

कार्त्तिकादिद्वादशवर्षाणि यथा । वराहसंहितायाम् ।
“नक्षत्रेण सहोदयमस्तं वा येन याति सुरराजमन्त्री ॥”
तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव ॥
वर्षाणि कार्त्तिकादीनि आग्नेयाद्भद्वयानुयोगीनि ।
क्रमशस्त्रिभञ्च पञ्चममन्त्यमुपान्त्यञ्च विज्ञेयम् ॥”
नक्षत्रेण गुरुसंयुज्यमाननक्षत्रेण । आग्नेयं कृत्तिका । पञ्चमं फाल्गुनं वर्षम् । अन्त्यमाश्विनम् । उपान्त्यं भाद्रम् ।
“अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥
द्वे द्वे चित्रादितारार्णां पूर्णपर्व्वेन्दुसङ्गते ।
मासाश्चैत्रादयो ज्ञेयास्त्रिकैः षष्ठान्त्यसप्तमाः ॥”
इति सत्कृत्यमुक्तावल्याञ्च ॥

पूर्णपर्व्वेन्दुसङ्गते पौर्णमासीयुते द्वे द्वे तारे तदेकवाक्यतया पूर्व्ववचने पौर्णमासीलाभः । यथा मासानां पौर्णमास्यां कृत्तिकादिसम्बन्धात् कार्त्तिकादित्वं तथा वर्षाणामपि गुरोः कृत्तिकादावस्तोदयसम्बन्धात् कार्त्तिकादित्वं तेन कृत्तिकारोहिण्योरेकतरस्मिन् गुरोरस्तोदयेऽन्यतरलाभे कार्त्तिकं वर्षम् । एवं मार्गशीर्षादि । अत्र वर्षद्वयघटकयोर्नक्षत्रयोरेकतरस्मिन् अस्तं गतो गुरुरन्यतरस्मिन्नुदेति तत्र का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं ततः पौषमित्यादिक्रमाद्गतिरिति । फलानि च ।
“शकटानलोपजीविकगोपीड़ाव्याधिशोकश्च ।
वृद्धिस्तु रक्तपीतकुसुमानां कार्त्तिके वर्षे ॥ १ ॥
सौम्येऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजैश्च शस्यनाशः ।
व्याधिभयं मित्रैरपि भूपानां जायते वैरम् ॥२॥
शुभकृज्जगतः पौषे निवृत्तवैराः परस्परं भूपाः ।
द्वित्रिगुणो धान्यार्घः पौष्टिककर्म्मप्रसिद्धिश्च ॥३॥
पितृपूजा परिवृद्धिर्म्माघे हार्द्दञ्च सर्व्वभूतानाम् ।
आरोग्यवृष्टिधान्यार्घसम्पदो मित्रलाभश्च ॥ ४ ॥
फाल्गुने वर्षे विद्यात् क्वचित् क्वचित् क्षेमवृष्टिशस्यानि ।
दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृपाश्चोग्राः ॥५॥
चैत्रे मन्दा वृष्टिः प्रियमन्नं क्षेममवनिपा मृदवः ।
वृद्धिश्च कोषधान्यस्य भवति पीड़ा च रूपवतनाम् ॥ ६ ॥
वैशाखे धर्म्मपरा विगतभयाः प्रमुदिताः प्रजाः सनृपाः ।
यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्व्वशस्यानाम् ॥ ७ ॥
ज्यैष्ठे जातिकुलधर्म्मश्रेणीश्रेष्ठा नृपाः सधर्म्मज्ञाः ।
पीड्यन्ते धान्यानि च हित्वा कङ्गुशमीजानि ॥८
आषाढ़े जायन्ते शस्यानि क्वचिद्वृष्टिरन्यत्र ।
योगक्षेमं मध्यं शस्यग्रा भवन्ति भूपाः ॥९॥
श्रावणे वर्षे क्षेमं कामं शस्यानि पाकमुपयान्ति ।
क्षुद्रा ये पार्थिवास्ते पीड्यन्ते ये च तद्भक्ताः ॥ १० ॥
भाद्रपदे वल्लीजं निष्पत्तिं याति पूर्व्वशस्यञ्च ।
न भवत्यपरं शस्यं क्वचित् सुभिक्षं क्वचिच्च दुर्भिक्षम् ॥ ११ ॥
आश्वयुजेऽप्यजस्रं पतति जलं प्रमुदिताः प्रजाः क्षेमम् ।
प्राण्युपचयः प्राणभृतां सर्व्वेषामर्थबाहुल्यम् ॥” १२ ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥

समाद्यादिपञ्चवत्सरा यथा, —
“शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः ।
सम्परीदानुपूर्व्वास्तु तथोदापूर्व्वका मताः ॥”
संवत्सरादिफलमुक्तं विष्णुधर्म्मोत्तरे ॥
“संवत्सरे तथा दानं तिलस्य तु महाफलम् ।
परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तमाः ॥
इदापूर्व्वेऽप्यवक्तायां धान्यानाञ्चानुपूर्व्वकैः ।
उदासंवत्सरे दानं रजतस्य महाफलम् ॥
ज्योतिर्व्विदस्त्विन्यमध्यात् प्रभवादेश्च सम्भवम् ।
ऋतुस्तद्वत् समाद्यादिवर्षाणामपि सम्भवम् ॥”
इन्यमध्यात् । गुरुमध्यभोगगणनात् । प्रभवादेः । प्रभवादिवर्षषष्टेः । इति मलमासतत्त्वम् ॥ * ॥
(ध्रुवपुत्त्रः । यथा, भागवते । ४ । १० । १ ।
“प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः ।